योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ०८

अष्टमः सर्गः ८

श्रीवसिष्ठ उवाच ।

अस्त्यस्तमितसर्वापदुद्यत्संपदुदारधीः ।

विदेहानां महीपालो जनको नाम वीर्यवान् ।। १

कल्पवृक्षोऽर्थिसार्थानां मित्रालानां दिवाकरः ।

माधवो बन्धुपुष्पाणां स्त्रीणां मकरकेतनः ।। २

द्विजकैरवशीतांशुर्द्विपत्तिमिरभास्करः ।

सौजन्यरत्नजलधिर्भुवं विष्णुरिवास्थितः ।। ३

प्रफुल्लवाललतिके मञ्जरीपुञ्जपिञ्जरे ।

स कदाचिन्मधौ मत्ते कोकिलालापलासिनि ।। ४

ययौ कुसुमिताभोगंसुविलासलताङ्गनम् ।

लीलयोपवनं कान्तं नन्दनं वासवो यथा ।। ५

तस्मिन्वरवने हृद्ये केसरोद्दाममारुते ।

दूरस्थानुचरः सानुकुञ्जेषु विचचार ह ।। ६

अथ शुश्राव कस्मिंश्चित्तमालवनगुल्मके ।

सिद्धानामप्रदृश्यानां स्वप्रसङ्गादुदाहृताः ।। ७

विविक्तवासिनां नित्यं शैलकन्दरचारिणाम् ।

इमाः कमलपत्राक्ष गीता गीतात्मभावनाः ।। ८

सिद्धा ऊचुः ।.

द्रष्टृदृश्यसमायोगात्प्रत्ययानन्दनिश्चयः ।

यस्तं स्वमात्मतत्त्वोत्थं निःस्पन्दं समुपास्महे ।। ९

अन्ये ऊचुः ।

द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह ।

दर्शनप्रथमाभासमात्मानं समुपास्महे ।। १०

अन्ये ऊचुः ।

द्वयोर्मध्यगतं नित्यमस्तिनास्तीति पक्षयोः ।

प्रकाशनं प्रकाश्यानामात्मानं समुपास्महे ।। ११

अन्ये ऊचुः ।

यस्मिन्सर्वं यस्य सर्वं यतः सर्वं यस्मायिदम् ।

येन सर्वं यद्धि सर्वं तत्सत्यं समुपास्महे ।। १२

अन्ये ऊचुः ।

अशिरस्कं हकारान्तमशेषाकारसंस्थितम् ।

अजस्रमुच्चरन्तं स्वं तमात्मानमुपास्महे ।। १३

अन्ये ऊचुः ।

संत्यज्य हृद्गुहेशानं देवमन्यं प्रयान्ति ये ।

ते रत्नमभिवाञ्छन्ति त्यक्तहस्तस्थकौस्तुभाः ।। १४

अन्ये ऊचुः ।

सर्वाशाः किल संत्यज्य फलमेतदवाप्यते ।

येनाशाविषवल्लीनां मूलमाला विलूयते ।। १५

अन्ये ऊचुः ।

बुद्ध्वाप्यत्यन्तवैरस्यं यः पदार्थेषु दुर्मतिः ।

बध्नाति भावनां भूयो नरो नासौ स गर्दभः ।। १६

अन्ये ऊचुः ।

उत्थितानुत्थितानेतानिन्द्रियाहीन्पुनः पुनः ।

हन्याद्विवेकदण्डेन वज्रेणेव हरिर्गिरीन् ।। १७

अन्ये ऊचुः ।

उपशमसुखमाहरेत्पवित्रं

सुशमवतः शममेति साधुचेतः ।

प्रशमितमनसः स्वके स्वरूपे

भवति सुखे स्थितिरुत्तमा चिराय ।। १८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे सिद्धगीतानामाष्टमः सर्गः ।। ८ ।।